श्री सुब्रह्मण्य मंगळाष्टकं

श्री सुब्रह्मण्य मंगळाष्टकं

शिवयोस्तनुजायास्तु श्रितमंदारशाखिने |
शिखिवर्यतुरंगाय सुब्रह्मण्याय मंगळं || 1 ||

भक्ताभीष्टप्रदायास्तु भवरोगविनाशिने |
राजराजादिवंद्याय रणधीराय मंगळं || 2 ||

शूरपद्मादिदैतेयतमिस्रकुलभानवे |
तारकासुरकालाय बालकायास्तु मंगळं || 3 ||

वल्लीवदनराजीव मधुपाय महात्मने |
उल्लसन्मणिकोटीरभासुरायास्तु मंगळं || 4 ||

कंदर्पकोटिलावण्यनिधये कामदायिने |
कुलिशायुधहस्ताय कुमारायास्तु मंगळं || 5 ||

मुक्ताहारलसत्कंठराजये मुक्तिदायिने |
देवसेनासमेताय दैवतायास्तु मंगळं || 6 ||

कनकांबरसंशोभिकटये कलिहारिणे |
कमलापतिवंद्याय कार्तिकेयाय मंगळं || 7 ||

शरकाननजाताय शूराय शुभदायिने |
शीतभानुसमास्याय शरण्यायास्तु मंगळं || 8 ||

मंगळाष्टकमेतद्ये महासेनस्य मानवाः |
पठंती प्रत्यहं भक्त्या प्राप्नुयुस्ते परां श्रियं || 9 ||

इति श्री सुब्रह्मण्य मंगळाष्टकं |